22R

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) – नियमित**

**परीक्षा : डिसेंबर – २०२३**

**सत्र १ ले**

**विषयः भरतनाट्यशास्त्र (22R314)**

**दिनांक :** १४/१२/२०२३ **गुण :** ६० **वेळ : स. १०.०० ते १२.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १. मातृभाषया त्रयाणामनुवादं करुत।** **(१५)**

१. कार्यं द्वारद्वयं चात्र नेपथ्यगृहकस्य तु । पूरणे मृत्तिका चात्र कृष्णा देया प्रयत्नतः ।।
लाङ्गलेन समुत्कृष्य निर्लोष्टतृणशर्करम् । लाङ्गले शुद्धवर्णो तु धुर्यौ योज्यौ प्रयत्नतः ।।

२. नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः। एवं नाट्यमिदं सम्यग्बुद्ध्वा सर्वैः सुतैः सह।।
स्वातिनारदसंयुक्तो वेदवेदाङ्गकारणम्। उपस्थितोऽहं ब्रह्माणं प्रयोगार्थं कृताञ्जलिः।।

३. विष्णुः सिंहासनं चैव कुबेरो मुकुटं तथा। श्राव्यत्वं प्रेक्षणीयस्य ददौ देवी सरस्वती।।
शेषा ये देवगन्धर्वा यक्षराक्षसपन्नगाः। तस्मिन्सदस्यभिप्रेतान्नानाजातिगुणाश्रयान्।।

४. कार्पासं बाल्बजं वापि मौञ्जं वाल्कलमेव च। सूत्रं बुधैस्तु कर्तव्यं यस्य च्छेदो न विद्यते।।
अर्धच्छन्ने भवेत्सूत्रे स्वामिनो मरणं ध्रुवम्। त्रिभागच्छिन्नया रज्ज्वा राष्ट्रकोपो विधीयते।।

५. भरतस्य वचः श्रुत्वा पप्रच्छुर्मुनयस्ततः। भगवन् श्रोतुमिच्छामो यजनं रङ्गसंश्रयम्।।
अथवा या क्रियास्तत्र लक्षणं यच्च पूजनम्। भविष्यद्भिर्नरैः कार्य कथं तन्नाट्यवेश्मनि।।

**प्र.२. ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत।** **(३०)**

१. लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।
२. अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः।
३. अशक्ता भगवन् देवा अयोग्या नाट्यकर्माणि।
४. द्वारं चैकं भवेत्तत्र रङ्गपीठप्रवेशनम्।
५. समुन्नतं समं चैव रङ्गशीर्षं तु कारयेत्।

**प्र ३. सविस्तरौ द्वौ लिखत।** **(१५)**

१. नाट्यं भावानुकीर्तनम्।
२. मत्तवारणी।
३. मण्डपप्रमाणानि।

----------